# Yadugirinarayana Stava

# યદુગિરિનારાયણસ્તવઃ

## Document Information

Text title : Yadugirinarayana Stava

File name : yadugirinArAyaNastavaH.itx

Category : vishhnu, vishnu, stava

Location : doc_vishhnu

Author : tirumalArya

Proofread by : Rajesh Thyagarajan, Divya KS

Description/comments : From Stotrasamuchchaya 2, Edited by Pandit K. Parameshwara Aithal

Latest update : May 10, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 9, 2024

*sanskritdocuments.org*

# યદુગિરિનારાયણસ્તવઃ

(બાધૂલશ્રીનિવાસાર્યકૃપાસમ્પન્નવૈભવમ્ ।
કૌશિક શ્રીનૃસિંહાર્ય કલ્યાણગુણમાશ્રયે ॥ )
તર્કાતર્કિમુધાગ્રહપ્રતિવદદ્દુર્વાદિદુર્વારદુ-
ર્ગર્વોર્વીધરકૂટકુટ્ટનકલાદમ્ભોલિવાગ્ગુમ્ભનઃ ।
વ્યાસોન્નીતનિશાતનીતિદલિતપ્રચ્છન્નબૌદ્ધવ્રજઃ
શ્રીરામાવરજો મુનિર્વિજયતે સિદ્ધાન્તજૈત્રધ્વજઃ ॥ ૧॥

આશાસે ષટ્પદામોદવહાં ગુરુપરમ્પરામ્ ।
શ્રીનારાયણપાદાબ્જમધુધારામિવાપરમ્ ॥ ૨॥

એધતાં યતિરાજસ્ય સામ્રાજ્યં સર્વતોમુખમ્ ।
યત્ર સમ્પત્કુમારોઽપિ યુવરાજપદાસ્પદમ્ ॥ ૩॥

વન્દે ભગવતઃ પાદૂ વકુલામોદમેદુરામ્ ।
તત્પદામર્શસમ્પન્નમઞ્જુશિઞ્જામનોરમામ્ ॥ ૪॥

સ્વામી સુશીલઃ સુલભઃ સર્વજ્ઞઃ સર્વશક્તિધૃત્ ।
વત્સલો યત્સહાયસ્તાં વન્દે યદુગિરીશ્વરીમ્ ॥ ૫॥

અસ્તિ સ્વસ્તિવહં લક્ષ્મીસંસ્તુતં વસ્તુ નિસ્તુલમ્ ।
ભૂનીલા સ્તન કસ્તૂરીભૂષિતં યદુભૂધરે ॥ ૬॥

સમિન્ધે શ્રીતનુલતાસ્વર્ણસબન્ધબન્ધુરઃ ।
યદુભૂધરકોટીરસ્ફુરન્મરતકાઙ્કુરઃ ॥ ૭॥

ઈક્ષે પ્રતિક્ષણં લક્ષ્મીપાદલાક્ષારસોક્ષિતમ્ ।
શ્રીયાદવાચલશિખા શેખરશ્યામલોત્પલમ્ ॥ ૮॥

પરેષાં શઙ્ખચક્રાદ્યૈઃ સ્વેપામભયમુદ્રયા ।
હિતં પ્રિયં ચ કલયન્ પાયાદ્યદુગિરીશ્વરઃ ॥ ૯॥

યદભ્યસ્તાનન્દામૃતજલધિકલ્લોલકણિકા-
    રસાસ્વાદાધ્માતા શ્રુતિરપિ વિહસ્તા નિવવૃતે ।
સ્વકીયં સાર્વજ્ઞ્યં પ્રભવતિ ન યસ્ય સ્વવિષયે
    યદુક્ષ્માભૃન્નાથં તમહહ વયં સ્તોતુમુદિતાઃ ॥ ૧૦॥

ગન્તું વર્ત્મ ગરુત્મતઃ પ્રયતતાં ખઞ્જઃ સ્વયં જાનુના
    વોઢું વલ્ગતુ ડુણ્ડુભઃ સ્વશિરસા શૈષીમશેષાં ધુરમ્ ।
સ્વૈરં પ્રક્રમતાં વિતસ્તિવિમિતસ્ત્રૈવિક્રમાન્ વિક્રમાન્
    આચાર્યૈઃ સ્તુતમાસ્તુમો વયમમી શ્રીયાદવાદ્રીશ્વરમ્ ॥ ૧૧॥

[અહહ ગણનાં ન્યક્કુર્વાણા ગુણા યદુભૂમિભૃત્-
પરિબૃઢ કથં સોઢારસ્તે પુનઃ સ્તુતિસાહસમ્ ।
અપિ તુ ભગવન્નેતે સ્વૈરં યતીશવશંવદાઃ
સરસમથુરસ્મેશઃ સમ્પ્રત્યતોઽયમુપક્રમઃ ॥ ]
વાર્ક્ષં માક્ષિકમાજિઘૃક્ષતિ ન કિં ખર્વો ન વાદિસતે
    બાલઃ કિં શશિનં સિષાધયિષતિ શ્રેયો ન કિં વાલસઃ ।
તુષ્ટૂષામિતરાં ન કિં યતિપતે સમ્પત્સુતં કિં તુ તત્
    સર્વં પ્રાપ્યરુચિપ્રકર્ષજમિતિ પ્રાજ્ઞઃ સમાધિત્સતુ ॥ ૧૨॥

અપિ ચ મમ વચાંસિ પ્રાયશો વેદવાદા-
    દપિ યદુકુલનાથં સ્વૈરમાવર્જયન્તિ ।
ન કિમુ મૃગમદેન્દુસ્મેરકાશ્મીરલેપા-
    દપિ રમયતિ ગોષ્ઠોપાન્તજમ્બાલચર્ચા ॥ ૧૩॥

પ્રિયં કુલધનં પ્રભું પિતરમીશ્વરં માતરં
    ગુરું પ્રણતવત્સલં પરમબન્ધુમાપત્સખમ્ ।
યદુક્ષિતિધરોપરિ વ્યવસિતાત્મદાનં ન કો
    યતિપ્રવરનન્દનં હૃદયચન્દનં વન્દતે ॥ ૧૪॥

મહસાં નિધયે ત્રયીશિખામણયે મઙ્ગલમઙ્ગલાત્મને ।
યદુભૂધરશ‍ૃઙ્ગબન્ધવે સ્પૃહયામ્યદ્ભુતશીલસિન્ધવે ॥ ૧૫॥

અસ્મૈ નમો યદુગિરિપ્રવરાય સૂરિ-
    સેવ્યાઙ્ઘ્રયે વિમલસત્ત્વગુણોત્તરાય ।
યઃ શ્વેતમૃત્તિલકિતો ધૃતવૈષ્ણવશ્રીઃ
    શ્રીકાન્તમવ્યવહિતં જગતાં વ્યનક્તિ ॥ ૧૬॥

ચામ્પેયાન્યપચિન્વતામુપવને માલાકૃતાં શ્રીપતે-
રાનમ્યોપનયન્તિ યત્ર કપયઃ સ્વૈરં દુરાપાણ્યપિ ।
ઈડે ક્રોડમુખાવખાતવિતતાવાલાવટાસેચન-
ન્યઞ્ચત્કુઞ્જરપુષ્કરામ્બુશિશિરં શ્રીયાદવક્ષ્માધરમ્ ॥ ૧૭॥

યત્રાનુષઙ્ગિકનિવાસલવોઽપિ સૂરિ-
સંસદ્ધુરાવિનિમયશ્રિયમાતનોતિ ।
તાસુ પ્રસન્નહરિચન્દનશેખરાસુ
શ્રીયાદવાચલતટીષુ કુટીમુપેયામ્ ॥ ૧૮॥

ઇયમભિવન્દ્યતાં યદુધરાધરમૌલિધૃતા
નૃહરિગૃહાન્તગોપુરસમુન્નતિરુન્મિષિતા ।
પરિણતભૂરિભાગ્યજનલોચનભૃઙ્ગકુલં
લલિતવતંસકૈતકશિખેવ સુખાકુરુતે ॥ ૧૯॥

રહસિ સહરિરંસાયાતકંસારિકાન્તા-
ચરણકમલસક્તાલક્તરત્નોપકણ્ઠાઃ ।
યદુધરણિભૃતોઽમી જન્મકાન્તારપાન્થ-
શ્રમહરતરુમૃષ્ટાઃ સાનવો નઃ પુનીરન્ ॥ ૨૦॥

રઘુપતિચાપકોટિદૃઢકુટ્ટનવિસ્ફુટિતોપલોચ્ચલદ્-
વિમલઝરીષુ કૃષ્ણબલરોપિતકરુપમહીજરાજિષુ ।
યતિપતિપાદરેણુપરિમર્શપવિત્રશિલાસુ નિર્ભરા
યદુગિરિસાનુસીમસુ રમેમહિ સાભિમતાઃ સમાઃ શતમ્ ॥ ૨૧॥

કુરવકમલ્લિકાવકુલચમ્પકકુન્દલતા-
ર્પિતકુસુમાવતંસમકરન્દરસોપચિતાઃ ।
યદુકુલદેવતાપદસરોજપરાગધર-
શ્ચિરમવગાહિષીય યદુશૈલઝરીલહરીઃ ॥ ૨૨॥

પદે તત્ર વિષ્ણોઃ પરત્વાનુભૂત્યા
પરં નિર્વૃતાસ્તસ્ય સૌલભ્યલોભાત્ ।
યદુક્ષ્માભૃદન્તે વસન્ત્યત્ર મુક્તા
નુમસ્તાન્ સમસ્તાંશ્ચરસ્થાસ્નુરૂપાન્ ॥ ૨૩॥

અધૂર્જટિજટાટવીતટકપાલસમ્પૂરણા-
મજહ્નુજઠરાનલક્વથનખિન્નયાદઃકુલામ્ ।

અસાગરચિતાવનોપચિતસાસ્થિભસ્મોત્કરા-
　　મનુજ્ઝિતયદુક્ષ્માધરપદાં ભજે સ્વર્નદીમ્ ॥ ૨૪॥

નિર્ણીચોચ્ચભિદં નિરાકૃતગુણાવદ્યાવમર્શં જના-
　　નાપ્લાવૈરનુગૃહ્ણતીં સુરુચિરાગાધપ્રસન્નાદ્ભુતામ્ ।
શ્રીમદ્યાદવભૂધરે સુચરિતોલ્લાસાવહામન્વહં
　　કલ્યાણીમવગાહિષીય કરુણાં નારાયણસ્યાપરામ્ ॥ ૨૫॥

હરેર્વરાહરૂપિણઃ શ્રમામ્બુસમ્ભવં ભવશ્રમાપહમ્ ।
ભવિષ્ણુવિષ્ણુપદ્યુપાસિતં સરશ્ચરીકરીતુ મઙ્ગલમ્ ॥ ૨૬॥

સેયં વૈષ્ણવનર્મહર્મ્યશિખરોદઞ્ચત્પતાકાવલી-
　　સઙ્ઘર્ષક્ષતચન્દ્રનિઃસૃતસુધાલિપ્તેવ દેદીપ્યતે ।
શ્વેતદ્વીપવિવર્તમૂર્તિરનઘશ્રીભૂમિનીલાસખ-
　　શ્રીનારાયણચિત્તનિર્વૃતિકરી નારાયણાખ્યા પુરી ॥ ૨૭॥

અશ્રાન્તોત્સવબદ્ધકૌતુકયતિક્ષોણીશસમ્પત્સુત-
　　પ્રસ્થાનોત્સુકપૌરયૌવતસુસમ્મૃષ્ટપ્રતોલીમુખામ્ ।
ફુલ્લત્પલ્લવતોરણચ્યુતમધુસ્યન્દાપનીતશ્રમા–
　　ઽશેષાગન્તુજનામિમામનિમિષં સેવે પુરીં યાદવીમ્ ॥ ૨૮॥

તત્તાદૃક્ષગજેન્દ્રમોક્ષણરથારોહક્ષણસ્વર્ધુની-
　　તીર્થાધ્યક્ષણપૂર્વપર્વમહિતે યસ્મિન્ યતીન્દ્રાજ્ઞયા ।
આમાતઙ્ગવસિષ્ઠમેતિ જનતા મુક્તૈકરસ્યાં શ્રિયં
　　સોઽયં પ્રત્યહમસ્તુ વજ્રમકુટીદિવ્યોત્સવો વાત્સરઃ ॥ ૨૯॥

સ્વાઙ્ગીકારોપહારીકૃતનતદુરિતાઃ સ્વાઙ્ઘ્રિરેણુપ્રભાવ-
　　પ્રેક્ષાસાક્ષીકૃતાસ્મત્સહપઠિતચતુર્વેદિસર્વાપરાધાઃ ।
શ્રીમન્નારાયણાઙ્ઘ્રિદ્વયપરિચરણૈશ્વર્યગર્વાદુદસ્ત-
　　શ્રીવૈકુણ્ઠોપકણ્ઠા યદુગિરિકટકસ્વામિનો મે સ્વદન્તામ્ ॥ ૩૦॥

શુચિ રુચિરં મનોજ્ઞચરિતં નલિનાક્ષદયા-
　　મૃતસરસીરસાર્દ્રમનુરઞ્જિતમઞ્જુરવમ્ ।
ઇદમિહ પક્ષપાતમનિમિત્તકમાદ્રિયતે
　　યદુ ગિરિહેમસાનુરસિકં મયિ હંસકુલમ્ ॥ ૩૧॥

ક્વેતું નઃ પ્રભવન્તિ હન્ત યતિરાડ્જન્મોત્સવોન્મસ્તક-

પ્રેમવ્યુત્ક્રમનૃત્યદાર્યચરણોત્ક્ષિપ્તા યદુક્ષ્માભૃતઃ ।
ધૂલ્યો યાઃ કિલ રઙ્ગવેઙ્કટમુખશ્રીદિવ્યદેશાશ્રિતૈ-
રર્ચ્યન્તે નિયમેન તીર્થવટિકારૂપેણ ગોપાયિતાઃ ॥ ૩૨॥

મધુરિપુજલનિધિદૃગમૃતવીચીકૃતપરિચિતિમુરુમણિગણકીર્ણામ્ ।
પરિસરનતસુરસદસમુપાસે યદુગિરિતટભુવિ તદજિરવેલામ્ ॥ ૩૩॥

તામ્બૂલદર્પણપતદ્ગ્રહતાલવૃન્ત-
ભૃઙ્ગારધૌતવસનાભરણસ્રગાદીન્ ।
આબિભ્રતો યતિપતિપ્રણિધીન્ વિભોર્દ્વિ-
પઞ્ચાશતઃ પરિજનપ્રવરાન્ ભજામઃ ॥ ૩૪॥

દ્રુહિણસનકયોગિનારાયણાત્રેયસંરક્ષિતં
યતિપતિકૃપયેહ સર્વાત્મસેવ્યાં દશાં પ્રાપિતમ્ ।
નિગમશિખરવત્ પરબ્રહ્મગર્ભં યદુક્ષ્માધર-
પ્રવણમનુભવેયમાનન્દસંજ્ઞં વિમાનં મુહુઃ ॥ ૩૫॥

શુભેદારસ્નિગ્ધાદ્ભુતમહિતસંસ્થાનમભિતઃ
સરન્તીભિર્ભાભિર્હરિતયદશેષાશ્ચ હરિતઃ ।
પરં જ્યોતિઃ સાક્ષાદકરવમિહાનન્દનિલયે
વિમાને મઞ્જૂષોન્મિષિતમિવ ?શાતમ્મરતકમ્ ॥ ૩૬॥

યુગપદુદિતભાસ્વત્કોટિધામા સુધાબ્ધિ-
સ્નપિત ઇવ સુજાતસ્નિગ્ધદિવ્યાદ્ભુતશ્રીઃ ।
ભુવનભવનભૂષા જ્યોતિષાં જ્યોતિરેષ
સ્ફુરતિ યદુમહીભૃન્મૌલિરત્નપ્રદીપઃ ॥ ૩૭॥

જગત્સમ્ભવક્ષેમશિક્ષાદિદક્ષં
પરં ક્ષોણિલક્ષ્મીકટાક્ષૈકલક્ષ્યમ્ ।
યદુક્ષ્માધરે મોક્ષદાનૈકદીક્ષં
મહઃ પુણ્ડરીકાક્ષમધ્યક્ષયામઃ ॥ ૩૮॥

અયે શ્યામોદારઃ કિમયમમૃતાધ્માતજલદ-
સ્તમાલદ્રુઃ કિંવા પૃથુલલલિતોદ્દામવિટપઃ ।
યદુક્ષ્માભૃત્સાનુપ્રગુણિતવિલાસો નુ કલમઃ
કિમુ ક્રીડાશૈલ શ્રિય ઇહ મહાનીલમહિતઃ ॥ ૩૯॥

દરીધર્તિ નીલાદ્રિલીલાં મુકુન્દો
 બરીભર્તિ હેમસ્નુતાં પીતવાસઃ ।
વરીવર્તિ ચક્રામ્બુજં પુષ્પવત્તાં
 ચરીકર્તિ શૃઙ્ગશ્રિયં રત્નમૌલિઃ ॥ ૪૦॥

મુખામ્ભોજાસક્તઃ કિમલકતમઃ કોપકલુષઃ
 કિમુ શ્રીમચ્ચક્ષુઃસ્વજનિવનોત્કઃ કિમથવા ।
જગચ્ચક્ષુઃ સાક્ષાન્મિષતિ યદુશૈલેશમકુટી-
 મિષેણ પ્રત્યૂષે તદિદમુપતિષ્ટેમહિ મહઃ ॥ ૪૧॥

ન્યગ્ચન્મૌલિમણિપ્રભાવિનમિતં પ્રોદ્યન્મુખેન્દુદ્યુતિ-
 પ્રત્યાવર્તિતમૂર્ધ્વપુણ્ડ્રવિમલચ્છાયાવિભક્તાકૃતિ ।
પાર્શ્વોચ્છૃઙ્ખલશઙ્ખચક્રરુચિભિઃ પ્રાયો વિશીર્ણં યદુ-
 ક્ષ્માભૃદ્વલ્લભચૂર્ણકુન્તલતમઃ ફાલાન્તમાલમ્બતે ॥ ૪૨॥

અમી યદુધરાધરેશ્વરકિરીટરત્નાકુરાઃ
 પરત્વમુખરામુહુર્મુહુરભીષયિષ્યન્ત નઃ ।
મૃદુસ્મિતસુધારસોક્ષિતકટાક્ષલીલાયિતા-
 ન્યકૃત્રિમસુશીલતાં સપદિ નાવદિષ્યન્ યદિ ॥ ૪૩॥

અનિમિત્તદયામૃતસિક્તમૃદુસ્મિતચન્દ્રિકમસ્તસમસ્તતમઃ ।
યદુશૈલપતેર્મુખમિન્દુસખં પ્રમદં મમ દૃક્કુમુદં કુરુતે ॥ ૪૪॥

દૃશોર્વિશાલમાયતં ભ્રુવોશ્ચ નીલમન્નતં
 સ્મિતે મૃદૂદ્ગતં સિતં રદેષુ સાન્દ્રમુજ્જ્વલમ્ ।
સ્ફુરદ્વિકાસિ ગણ્ડયોશ્ચલં વિલમ્બિ કુન્તલે ।
 યદુક્ષમાધરેશિતુર્મુખં સુખં કરોતિ નઃ ॥ ૪૫॥

નીલભ્રૂમરુકગ્રમાયતદૃગમ્ભોજં મિષન્નાસિકા-
 ચામ્પેયં ધવલોર્ધ્વપુણ્ડ્રકપટોદગ્ચચ્છિખાકૈતકમ્ ।
ઉત્ફુલ્લાધરપલ્લવં ક્ષિતિરમાલીલોચિતં કન્ધરા-
 કાણ્ડોદગ્ચિ યદુક્ષમાધરપતેર્મન્યે મુખં કન્તુકમ્ ॥ ૪૬॥

સ્ફુરચ્ચક્ષુર્મીનાચ્છ્રવણલલિતાવર્તમહિતાદ્
 યદુક્ષ્માભૃત્સાનુપ્રણયિમુખલાવણ્યજલધેઃ ।
સુબાસૂતેરોષ્ઠદ્વયરુચિરવીચી વિષમિતા-
 દુદેતિ ભ્રૂવેલાવનપિહિતભાગોડલિકશશી ॥ ૪૭॥

ભ્રૂમધ્યતઃ પ્રતિપદિન્દુકલાવદાત-
    શ્વેતો ધિનોતિ તિલકો યદુશૈલબન્ધોઃ ।
લાલાટકાન્ત્યમૃતસઙ્ગ્રહણાય લક્ષ્મી-
    નિક્ષિપ્તમૌક્તચવકશ્રિયમાદદાનઃ ॥ ૪૮॥

ભ્રૂસેતુબન્ધવિધૃતાક્ષિતટાકકુલ્યા
    કલ્યા કટાક્ષસરણિર્યદુશૈલનેતુઃ ।
નિમ્નોન્નતસ્થલજલાદિભિદાનપેક્ષ-
    માપ્લાવયત્યમુમિમં કરુણાસકુલ્યા ॥ ૪૯॥

અકસ્માદસ્માકં પ્રચુરપરિતાપપ્રશમનૈઃ
    કટાક્ષોર્મિક્ષેપૈરનવધિકૃપાસૌરભવહૈઃ ।
સુધાસિન્ધુઃ સાક્ષાદયમિહ યદુક્ષ્માધરતટે
    સ્વસેવાસામ્રાજ્યૌપયિકમભિષેકં વિતનુતે ॥ ૫૦॥

તન્મન્દસ્મિતવિસ્મિતં તદલકાવર્તાનુવૃત્તં મુહુ-
    સ્તદ્બિમ્બાધરરાગરક્તમનુ તત્સૌગન્ધ્યસમ્મોદિતમ્ ।
તદ્ભ્રૂવિભ્રમલબ્ધવિભ્રમશતં તદ્દૃક્તરઙ્ગોર્મિલં
    મચ્ચેતો યદુશૈલવલ્લભમુખચ્છાયોન્મુખં વર્તતે ॥ ૫૧॥

કર્ણિકામકરયુગ્મમુદગ્રં કર્ણપાશબડિશં વિનિગીર્ય ।
વેષ્ટતે યદુગિરીશમુખાંશૂત્કૃષ્યમાણમિદમંસતટાકાત્ ॥ ૫૨॥

પાઞ્ચજન્યમુપનીય સરૂપં રૂપસૌષ્ઠવવિવેચનચઞ્ચુઃ ।
યાદવાચલપતિર્ગલકમ્બું તારહારકલિતં કિમતાનીત્ ॥ ૫૩॥

પાર્શ્વોદઞ્ચન્ન્યઞ્ચત્કુઞ્ચદ્ભુજકલ્પવિટપમઞ્જર્યઃ ।
શઙ્ખરથાઙ્ગગદાભયમુદ્રા ભદ્રાય યાદવાદ્રીન્દોઃ ॥ ૫૪॥

શ્રીભૂમીકુચકુમ્ભનિર્ભરપરીરમ્ભપ્રમોદાદિવ
    શ્રીદિવ્યાયુધભવ્યભૂષણપરામર્શાવલેપાદિવ ।
તારુણ્યાદ્ભુતયૌવનવ્યતિકરોત્સાહાદિવામી યદુ-
    ક્ષ્માભૃદ્વલ્લભબાહવઃ સુપૃથુલોદગ્રાઃ પરં જાગ્રતિ ॥ ૫૫॥

વિટપાઃ કિલ કલ્પપાદપાનાં મધુપાવર્જિતપલ્લવપ્રસૂનાઃ ।
યદુશૈલપતેર્ભુજાઃ સુવૃત્તાઃ ફલવર્ગાન્ સુવતેઽત્ર સૂરિભોગ્યાન્ ॥ ૫૬॥

આભ્યામઙ્ગ્યતેતિ વોપનયતઃ શ્રીશઙ્ખચક્રે ઉભા-
વેતાવાશ્રયતેતિ વક્તિ ગદયા નિર્દિશ્ય પાદૌ પરઃ ।
મા ભૈષ્ટેત્યપરો વ્યનક્તિ યદુભૂભૃદ્વલ્લભાસ્માદૃશા-
માદ્યાચાર્ય ચતુર્ભુજૈઃ પ્રગુણયસ્યાચાર્યકપ્રક્રિયામ્ ॥ ૫૭ ॥

સ્વતઃ શ્યામોદારં તરુણતુલસીદામહરિતં
સિતં મુક્તાહારૈર્મણિવરરુચા ભાસ્વરમિદમ્ ।
રમાપાદાલક્તારૂણમિહ યદુક્ષ્માધરપતે-
રુરશ્ચિત્તે ધત્તે મમ રુચિવિભેદાન્ નવનવાન્ ॥ ૫૮ ॥

શ્રીકાન્તકલ્યાણગુણાનુષક્તમુક્તાવલીસંસ્કૃતદિવ્યધામ ।
વક્ષો યદુક્ષોણિધરેશ્વરસ્ય મન્યે પરં વ્યોમ પરાર્ધ્યભૂમ ॥ ૫૯ ॥

નિગિરદપિ જગન્તિ ક્ષામમુધદ્બુભુક્ષં
સુચરિતસુતભિક્ષાસ્વાદસમ્પૂર્ણકામમ્ ।
યદુવરણિધરેન્દોસ્તુન્દમાદૌ યશોદા-
કલિવકિનકદામગ્રન્થિલક્ષ્મ પ્રતીક્ષે ॥ ૬૦ ॥

શ્રીયાદવાચલપતેઃ કલ્યેવ લગ્નં
કક્ષ્યાવનદ્ધકનકત્સરુખડ્ગવલ્લિ ।
ગાઢં નિકૃન્તદિવ નિષ્ઠુરકર્મબન્ધ-
નિર્બન્ધબન્ધુરચતુર્વિધદેહબન્ધમ્ ॥ ૬૧ ॥

વિદ્યુદ્ભૂમ્ના તટિત્વાનિવ નવતરણિચ્છાયયેવાઞ્જનાદ્રિ-
ર્વેલઃહૈમસ્થલીભિર્જલધિરિવ નભઃ સાન્દ્રસાન્ધ્યશ્રિયેવ ।
આક્રીડઃ કર્ણિકારૈરિવ કનકકુથેનેવ દન્તાવલોઽસૌ
દેવઃ પીતામ્બરેણ પ્રથયતિ સુષુમાં યાદવક્ષ્માધરેન્દુઃ ॥ ૬૨ ॥

એવમ્પ્રાયાનુપૂર્વી યદપિ કરિકરે સ્નિગ્ધતા દૂરદૂરે
રમ્ભાસ્તમ્ભે પ્રસક્તા યદપિ ચ કિયતી સ્નિગ્ધતા ક્વાનુપૂર્વી ।
સ્યાતાં સ્નૈગ્ધ્યાનુપૂર્વ્યૌ કૃતકમરતકસ્તમ્ભકે નો મૃદુત્વં
મન્યે મૃગ્યોપમાને યદુશિખરિપતેરુરુકાણ્ડપ્રકાણ્ડે ॥ ૬૩ ॥

કિં કાહલ્યૌ કિન્નુ પૂગીકુહલ્યૌ શ્રીભૂવાહ્યે કિં સમીચ્યૌ કલાચ્યૌ ।
મુગ્ધસ્નિગ્ધોદારદિવ્યાનુપૂર્વ્યૌ કિંવા જઙ્ઘે શ્રીયદુક્ષ્માધરેન્દોઃ ॥ ૬૪ ॥

વિભોઃ પાદામ્ભોજં તદિદમશરણ્યૈકશરણં

પરં પ્રાપ્યં પ્રાપ્તં યદુગિરિશિખાશેખરસખમ્ ।
યદામર્શાદાશુ દ્રવતિ ભૃશમાકાશમવશા-
દપિ ગ્રાવા જીવત્યપિ મિષતિ દગ્ધામિષમપિ ॥ ૬૫॥

સુચરિતસુમતિસહિતપરચરણપ્રણયમનનુગુણમિવ પરિગણયન્ ।
યદુગિરિપરિબૃઢચરણમશરણઃ શરણમગમમિહ પરિચરણપરઃ ॥ ૬૬॥

ક્ષમાલક્ષ્મીકલ્પવ્રતતિવિતતાં નાતિશિશિરા-
મનુષ્ણામભ્યર્ણોન્મિષદમૃતસૌગન્ધ્યસુભગામ્ ।
ભકયધ્વભ્રાન્તિપ્રભવપરિતાપપ્રશમનીં
શ્રયે પાદચ્છાયાં યદુગિરિતટીકલ્પકતરોઃ ॥ ૬૭॥

ઉદ્યન્મૌલિમુદારફાલમુચિતશ્વેતોર્ધ્વપુણ્ડ્ર શુભો-
દઞ્ચદ્ભ્રૂલતમાયતાયતદૃગમ્ભોજં સુજાતસ્મિતમ્ ।
કમ્બુગ્રીવમુદગ્રબાહુવિટપં લક્ષ્મીલસદ્વક્ષસં
વન્દે સુન્દરમધ્યમોરુચરણ શ્રીયાદવાદ્રીશ્વરમ્ ॥ ૬૮॥

ઉત્ફુલ્લપદ્મપદમુલ્લસદૂરુકાણ્ડમુદ્દામકાઞ્ચિમુપવીતસુવર્ણચેલમ્ ।
આજાનુબાહુમરુણાધરમાયતાક્ષમાશાસ્મહે સપદિ યાદવશૈલનાથમ્ ॥ ૬૯॥

શમયતિ તમઃ સૂતે સર્વં ધિનોતિ શુભાં ધિયં
ઘટયતિ સતાં સક્તિં દત્તે સદાર્યસમાશ્રયમ્ ।
ભવપથપરિભ્રાન્તિં રુન્ધે વ્યનક્તિ પરં પદં
યદુગિરિશિખારૂઢં જ્યોતિઃ કિમપ્યતિમાનુષમ્ ॥ ૭૦॥

અવ્યાજં દયતે સ્મરત્યુપનયત્યાલોકતેઽઙ્ગીકરો-
ત્યુત્સઙ્ગે કુરુતે પ્રસીદતિ મુહુર્મૂર્ધાનમાજિઘ્રતિ ।
આનન્દાનનુભાવયત્યભિમતૈર્દાસ્યામૃતૈઃ પ્લાવય-
ત્યેષ શ્રીયદુશૈલમઙ્ગલનિધિર્નારાયણોઽસ્મત્કુલમ્ ॥ ૭૧॥

પ્રેમાર્દ્રાયા કમલયા ક્ષમયા સમેત
મંસાંસઘટ્ટનરસોત્પુલકાઙ્ગભાગમ્ ।
પ્રાગ્દક્ષિણે તદિહ સંયમિસાર્વભૌમ-
સમ્પત્પ્રસૂતમપરં વપુરાવિરસ્તિ ॥ ૭૨॥

શ્રીભૂસ્તનશ્રુતિશિરોયતિશેખરાઙ્ક-
શ્રીયાદવાચલશિખાસુલભોપલમ્ભમ્ ।

આપન્નતાપહરમાશ્રિતકામધેનુ-
    માશાસ્મહે કમપિ પૂરુષમમ્બુજાક્ષમ્ ॥ ૭૩॥

ઉત્તુઙ્ગં મકુટે વિશાલમલિકે વક્રં ભ્રુવોરાયતં
    નેત્રાન્તે રુચિરં કપોલફલકે સ્મેરં મુખામ્ભોરુહે ।
સ્ફીતં વૃક્ષસિ સંસ્થુલં ભુજવને મૃગ્યં વલને સુસં-
    શ્લિષ્ટં પાદયુગે યતીન્દ્રહૃદયાવાસં મહઃ સંશ્રયે ॥ ૭૪॥

હસ્તારવિન્દકલિતાભયશઙ્ખચક્ર-
    મબ્જાસનાહિતપદાબ્જમુદગ્રમૌલિ ।
આવિઃસ્મિતં સુવદનં યતિરાજસૂનોઃ
    સંસ્થાનમેવ શરણં શરણાર્થિનાં નઃ ॥ ૭૫॥

અઞ્ચત્કિરીટમલકાવૃતફાલમાય-
    ન્નેત્રાબ્જમઙ્કુરિતહાસમુદગ્રનાસમ્ ।
વિષ્વગ્ભુજં વિપુલવક્ષસમીક્ષિષીય
    સમ્પત્સુતં તત ઇતઃ પુરતોઽભિતશ્ચ ॥ ૭૬॥

જનો યત્સીમાન્તે યતિનૃપતિવાર્તામહિમવિત્
    કુટીં કુર્વન્નીષ્ટે પરમપદવાટીવિતરણે ।
તદર્યાગારાન્તાવકરમપનેતુઃ કિલ સમાઃ
    શતં ભોગસ્થાનં મમ ભવતુ નારાયણપુરમ્ ॥ ૭૭॥

અચિન્તયિત્વા મદ્વૃત્તમાલોક્યાચાર્યસન્તતિમ્ ।
દયાનિધે નિધેહિ ત્વદ્દાસદાસ્યશ્રિયં મયિ ॥ ૭૮॥

ઇતિ તિરુમલાર્યકૃતઃ શ્રીયદુગિરિનારાયણસ્તવઃ સમ્પૂર્ણઃ ।
સ્તોત્રસમુચ્ચયઃ ૨ (૬૮)

Proofread by Rajesh Thyagarajan, Divya KS

*Yadugirinarayana Stava*

pdf was typeset on January 9, 2024

Please send corrections to *sanskrit@cheerful.com*